## सुन्दरकाण्ड पञ्चाशः सर्गः (५०) - ॥ प्रहस्त प्रश्नः ॥

तमुद्वीक्ष्य महाबाहुः पिङ्गाक्षं पुरतः स्थितम् ।
कोपेण महताविष्टो रावणो लोक रावणः ॥ १ ॥

शङ्का हतात्मा दध्यौ स कपीन्द्रं तेजसावृतम् ।
किमेष भगवान् नन्दी भवेत् साक्षादिहा गतः ॥ २ ॥

येन शप्तोऽस्मि कैलासे मया सञ्चालिते पुरा ।
सोऽयं वानरमूर्तिः स्यात् किंस्विद् बाणोऽपि वासुरः ॥ ३ ॥

स राजा रोष ताम्राक्षः प्रहस्तं मन्त्रि सत्तमम् ।
कालयुक्त मुवाचेदं वचो विपुल मर्थवत् ॥ ४ ॥

दुरात्मा पृच्छ्यतामेष कुतः किं वास्य कारणम् ।
वनभङ्गे च कोऽस्यार्थो राक्षसीनां च तर्जने ॥ ५ ॥

मत्पुरीमप्र धृष्यां वागमने किं प्रयोजनम् ।
आयोधने वा किं कार्यं पृच्छ्यता मेष दुर्मतिः ॥ ६ ॥

रावणस्य वचः श्रुत्वा प्रहस्तो वाक्य मब्रवीत् ।
समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे ॥ ७ ॥

यदि तावत् त्व मिन्द्रेण प्रेषितो रावणालयम् ।
तत्त्व माख्याहि मा भूत्ते भयं वानर मोक्ष्यसे ॥ ८ ॥

यदि वैश्रवणस्य त्वं यमस्य वरुणस्य च ।
चार रूपमिदं कृत्वा प्रविष्टो नः पुरीमिमाम् ॥ ९ ॥

विष्णुना प्रेषितो वापि दूतो विजय काङ्क्षिणा ।
न हि ते वानरं तेजो रूप मात्रं तु वानरम् ॥ १० ॥

तत्त्वतः कथयस्वाद्य ततो वानर मोक्ष्यसे ।
अनृतं वदतश्चापि दुर्लभं तव जीवितम् ॥ ११ ॥

अथवा यन्निमित्तं ते प्रवेशो रावणालये ।
एवमुक्तो हरिश्रेष्ठस् तदा रक्षो गणेश्वरम् ॥ १२ ॥

अब्रवीन् नास्मि शक्रस्य यमस्य वरुणस्य वा ।
धनदेन न मे सख्यं विष्णुना नास्मि चोदितः ॥ १३ ॥

जातिरेव मम त्वेषा वानरोऽह मिहागतः ।
दर्शने राक्षसेन्द्रस्य दुर्लभे तदिदं मया ॥ १४ ॥

वनं राक्षस राजस्य दर्शनार्थे विनाशितम् ।
ततस्ते राक्षसाः प्राप्ता बलिनो युद्ध काङ्क्षिणः ॥ १५ ॥

रक्षणार्थं तु देहस्य प्रतियुद्धा मया रणे ।
अस्त्रपाशैर्न शक्योऽहं बद्धुं देवासुरैरपि ॥ १६ ॥

पितामहादेव वरो ममाप् येषो भ्युपागतः ।
राजानं द्रष्टु कामेन मयास्त्र मनुवर्तितम् ॥ १७ ॥

विमुक्तो ह्यह मस्त्रेण राक्षसैस् त्वभि पीडितः ।
केनचिद् राजकार्येण सम्प्राप्तोऽस्मि तवान्तिकम् ॥ १८ ॥

दूतोऽहमिति विज्ञेयो राघवस् योमितौजसः ।
श्रूयतां चापि वचनं मम पथ्यमिदं प्रभो ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चाशः सर्गः
॥ ५० ॥